# वैदिकं ब्रह्माण्डं खगोलशास्त्रं च

**Sachchidanand Mishra**

Department of Jyotish, Banaras Hindu University, Varanasi-5

***Abstract***

*"Vedouakhilou DharmamulamiW was the reference of 1st law book written by Manu. Manusmriti was the first book of law for man. Rigveda is the first book of earth. Vedas are the sources of total knowledge. All thing related to human life already given in vedas. Mathematical astronomical, cosmological, creation, stability and destruction of the world, movement of time circle, zodiacal system and other things are given in vedas. These are most important scientific subjects various vedic suktas and mantras are also indicator of important things and observational conclusion. They are also related with origin of universe, structure of expanding universe, and human life related other things are also indicated in the vedas.*

*Zodiacal time circle staller systems and solar system deeply observed by modern scientist. Some astronomical and cosmological systems already decoded now. Some cosmic theories are under research. Actual conclusion of vedic concept is not decoded by research. Without current research work actual vast knowledge of vedas are far.*

*Vedic system also indicate us formation and position of universe, cosmos and heavenly bodies the starts, sun moon and others. Now souma called hydrogen, solar agni called helium. Total solar points indicated in ethentric way. How universal system is creating spreading in unending time and space circle.*

*What is a source of cosmic cloude and how stars are converting to black hole. I can prove all these things related with vedic cosmology and stronomy in ethentric way, mainly theoretically and logically.*

***१. त्रिगोलीयविश्वसंस्थानं ग्रहर्क्षाणां प्रभावद्योतकत्वेन संवत्सर विचारश्च***

(१) "अनन्तानि वै ब्रह्माण्डानि" इति तैत्तिरीयश्रुतिप्रमाणेन ब्रह्माण्डानामनन्तत्वं व्यक्तं भवति अनन्तब्रह्माण्डेष्वपि स्वकीयं ब्रह्माण्डं चतुर्दशभुवनात्मकं विद्यते । अयं सन्दर्भः प्रबन्धस्यास्य क्रमे निरूप्यते।

*परात्परकेन्द्रसम्बद्धान्यनन्तमहाब्रह्माण्डानि सन्ति।*

*महाब्रह्माण्डकेन्द्रसम्बद्धानि सन्त्यनन्तब्रह्माण्डानि ।*

तत्र स्वकीय ब्रह्माण्डं सत्यकेन्द्रिकमेव। स्वब्रह्माण्डीय चतुर्दशभुवनेषु भूगोलादुर्ध्वं सप्तोर्ध्वलोकास्तथाधः सप्तपाताललोकाः सन्ति । तत्र सप्तोर्ध्वलोकेषु जनः तपः सत्यं च न दृश्यते। केन्द्रप्रतिकेन्द्रान्तरसिद्धान्तेन स्व-स्व केन्द्रिकाकर्षणनिष्पत्या सर्वे लोकाः भुवनानि वा निबद्धानीति सङ्केतोऽपि वैदिकवाङ्मये प्राप्यते। महर्लोकः महाकाशः महानस्वर्गः महत्पिण्डानां निकेतनं मन्यते।[१]

द्युलोकः महर्लोकादधः स्तरत्रयात्मकः सूर्यादारभ्य ध्रुवान्तं मन्यते। ध्रुवादुर्ध्वं महर्लोकः। सूर्यः वरूणकेन्द्रिकः ससूर्यवरूणः यमकेन्द्रिकः सङ्केतित इति वैदिकमूलेन विज्ञान विद्युतः प्रमाणेन ज्ञायते।[२]

त्रिलोक शब्देन भूः भुवः स्वश्चेति । तत्र भूः नाम भूगोलः भुवः नाम भूगोलीयान्तरिक्षं स्वः नाम सूर्यः नक्षत्राणि वरूणात्मकाश्चाकाशगङ्गास्तथा यमात्मकानि केन्द्राणि च समगच्छन्ति।[३]

ऋग्वेदसंहितायां यजुर्वेदसंहितायां शतपथब्राह्मणं तथैत्तरेय तैत्तिरीयताण्डयगोपथादिषु ब्राह्मणग्रन्थेषु विश्वसंस्थानं त्रिगोलीयायनं च सम्यकवर्णितं दृश्यते।[४]

***(२) सम्बत्सरस्वरूपम्***

शतपथब्राह्मणे तथा ऋग्वेदे च ऋतुचक्रपर्ययः सम्वत्सरद्योतकत्वेन प्राप्यते । समानां मास आकृतिः । अर्थात् वर्षस्याकृतिर्मासाः कथिता।[५]

Vijnana Bharati

वेदमासो धृतव्रतो द्वादशप्रजावतः। वेदा य उपजायते। अर्थात् धृतव्रतः प्रजावतः द्वादशमासाः द्वादशप्रजवतः वरुणः वेद जानातीत्यर्थः। अनेन वर्षे द्वादशसौराश्चान्द्राश्च मासाः सिद्ध्यन्ति। द्वादशारं न हि तज्जराय ववर्तिचक्रं परिध्यामृतस्य। आपुत्रा-अग्नेर्मिथुनासो सप्त शतानि विंशतिश्च तस्थुः।[६]

अर्थात् द्वादशारं द्वादशविभागात्मकं राशिचक्रात्मकं द्वादशमासात्मकं राशिमण्डलं तन्नहि जराय विनाशायेति। परिद्यामृतस्य चक्रं ववर्ति। अर्थाद् द्युलोकममृतात्मकं चक्रप्रतिचक्रात्मकेन भ्रमतीत्यर्थः। इमेऽग्निपुत्राः मिथुनासो सप्तशतानि विंशतिश्च ३६०°× २ = ७२० दिवस रात्र्योः विभाजकाः सन्ति। अत्र सापेक्षिकत्वेन सौरभ्रमणप्रमाणेन वर्षगतांशात्मकविभागवशात् दिनरात्र्योः संख्याः मिथुनात्मकत्वेनाग्नेः निरूपिताः। द्वादशविभागात्मकाः द्वादशपरिधयस्तथैकचक्रं त्रीणिनाभ्यानि चात्र कथितानि। इत्यनेन सूर्यस्याभाषिकत्वेन भ्रमणात्मकचक्रं सम्पद्यते तं चक्रं को वेत्ति? यत्र चक्रे ३६० शङ्कवोऽर्पिताः। अस्य चलाचलासः चलत्वं न प्रतिभाति परं चलत्वं विद्यते। यथात्र[७]

*द्वादशप्रधयश्चक्रमेकं त्रीणि नाभ्यानि क उ तच्चिकेत।*
*तस्मिन्त्साकं त्रिशतान् शंकवोऽर्पिताः षष्टिर्न चलाचलासः।*

अनेन संवत्सरचक्रे सूर्यकृताः द्वादशमासाः द्वादशप्रधयः ३६० शङ्कवः ३६० सौरदिवसाः चलात्मकाः सन्ति परमचलाख्याः प्रतिभान्ति।

तैत्तिरीयसंहितायां द्वादशमासैः सहाधिमासस्यापि सङ्केतः प्राप्यते। यथा[८]

मधुश्चमाधवश्च शुक्रश्च शुचिश्च नभश्च नभस्य श्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयाम गृहीतोऽसिसं सर्पोस्यहस्पत्यायत्वा।

अत्र संसर्पोऽधिमासाख्योऽहस्पतिस्तु क्षयाख्यमासस्तथा मधुप्रभृतयः तपस्यान्तं द्वादशमासाः ऋत्वाभिप्रायिकाः सौरचान्द्रयोः समवेतत्वेन सङ्केतिताः। अत्र भाष्यकारमाधवाचार्यमतेन मधुमाधवादीनां वर्णनत्वान्मासानां सौरत्वं परं संसर्पस्याधिमासत्वेन तथाहस्पतेः क्षयाख्यमासत्वेन निवेशत्वाच्चान्द्रमासस्यापि समन्वितरूपमुपलभ्यत।

**( ३ ) ऋतुक्रमः –**

तैत्तिरीयसंहितायां ऋतुक्रमोऽपि प्राप्यते। यथा[९]– मधुश्चमाधवश्च बासन्तिकावृत शुक्रश्च शुचिश्च ग्रैष्मावृत नभश्चनभस्यश्च वार्षिकावृत इषश्चोर्जश्च शरदावृतु सहश्च सहस्यश्च हैमन्तिकावृतु तपश्च तपस्यश्च शैशिरवृतु।

एवं षडऋतवः सङ्केतिताः। द्वौ-द्वौ मासौ प्रतिऋतुक्रमे वसन्तादिक्रमेण सम्वत्सरे षडऋतवः कथिताः। रीत्यत इति परिलक्ष्यते ऋत् तत्त्वस्यान्तरमनेनेति ऋतुः। ऋतवः सम्वत्सरचक्रपर्ययबोधकः।[१०]

अत्र ऋतुचक्रस्य सम्वत्सरत्वं प्रतिपादयन् मासादिवसादीनां विभागाः शुभमुहूर्त्तसंयोगेन दीक्षादीनां विधानमपि दर्शितम्। मधुमाधवौ वसन्तद्योतकौ वसन्तस्य प्रमीयत्वात्। एवं यदा बसन्ताप्रमीयते तदा बसन्तः। एवमन्येषामपि बोधः।

*यजुर्वेदीय वाजसनेयिसंहितायां* वर्षस्य ऋतुक्रमबोधकपर्ययो विभागश्च तथा कालस्य व्यक्तत्वेन सौरचान्द्रसावनादि भेदाः निरूपिताः। तत्र कालस्य सूक्ष्मविभागस्य सङ्केतोऽपि प्राप्यते। यथा[११] – उपयाम गृहीतोऽसि। मधवे .............. आबृहस्पतये त्वा।।

एवमैतरेयब्राह्मणेऽपि प्रमाणमुपलभ्यते।[१२] इत्यत्र ऋतुपर्यायबोधकत्वेन सम्वत्सरचक्रं सापेक्षिकत्वेन सूर्यभ्रमणानुरोधेन प्राप्यते। चन्द्रान्तरवशादधिमासपातस्य परम्परापि वैदिककालादेवागच्छति। मन्दोच्चस्य स्पष्टचर्चाभावेऽपि क्षमाख्यमासपातस्य स्पष्टसङ्केतोऽपि वैदिककालादेव प्राप्यते। तैत्तिरीयब्राह्मणेऽधिमासक्षयमासयोः संस्कारप्रकारोऽपि समुप-लभ्यते। एवं कालगणनं सूक्ष्मत्वेन वैदिकवाङ्मये प्राप्यते। अतोऽग्रे ब्रह्ममोत्पत्तिमवलम्ब्य विचार्यते

**( ४ ) ऐतिहासिकक्रमः –**

प्राचीन वैदिक परम्परा सर्वतो भावेन विशिष्टा आसीदिति विभिन्न प्रमाणानि प्राप्यन्ते।

यास्कात्पूर्वमेव ऋषिकालः समाप्तः। प्राचीन ज्ञानविज्ञानकलादर्शनाध्यात्मादीनां युगानुरोधेन यथोपलब्ध्या वर्गीकरणं हि महाभारतादनन्तरं प्रारब्धम्। पूर्वक्रमे सप्रयोगविस्तृतानां सङ्कोचक्रमोऽपि सूत्रकाले दृश्यते। यास्कः चाणक्यः वराहः, आर्यभट्टः ब्रह्मगुप्तः, भास्करः, बल्लालः, गणेशदेवज्ञः जयसिंहः, मधुसूदनओझा, लोकमान्यतिलकः डॉ. वासुदेवशरण अग्रवालः , डॉ. बम्बावले, गिरिधरलालशर्मा चतुर्वेदः, गोपीनाथकविराजः, डॉ. कपिलदेव द्विवेदी, म.म. सुधाकर द्विवेदी प्रभृतयः स्वनामधन्याः – महान्तः विशेषज्ञाः

Vijnana Bharati

खृष्टपूर्व ८०० तः साम्प्रतं यावज्जाताः ।

*२. वैदिक ब्रह्माण्डं खगोलशास्त्रं च*

*(१) ब्रह्माण्डोत्पत्तिः* – ऋ.सं., १०/७२

*देवानां नु वयं जाना प्रवोचामविपन्यया। उक्थेषु शस्यमानेषु यः प श्यादुत्तरे युगे ।। ब्रह्मणस्पत्ति वीर्येण ........ भद्रा अमृत बन्धवः ।।*

व्यक्त विश्वस्य समुत्पत्तितः पूर्वावस्थायाः वर्णनमत्र दृश्यते सहैवोत्पत्तिक्रमस्यापि ।

*(२) ब्रह्माण्डीयोत्पत्तिक्रमः* – ऋ.सं. १०/१९०/१-३.

*ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः समुद्रो ऽर्णवः ।।*

*समुद्रादर्णवादधिसम्बत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतोवशी ।।*

*सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत । दिवञ्चपृथिवीञ्चान्तरिक्षामथो स्वः ।।*

अत्र ऋतसत्ययोः संयोगेन विश्वमहार्णवस्योद्भवः निरूपितः। ततः क्रमात् द्वैतविश्वं पिण्डात्मकं पिण्डीयान्तरिक्षं च समुत्पन्नम् ।

*(३) द्युलोकीयविकासः* – तै.ब्रा., १/१/३.

आपो वा इदमग्रे सलिलमासीत्। तेन प्रजापतिरश्रामयत। कथमिदं स्यादिति .......... अत्र नक्षत्रादारभ्य भूगोलान्तमुत्पत्तिः गतिश्चात्रवर्णितः । *तै.सं., ७/१/५/२१.* आपो वा इदमग्रे सलिलमासीत। तस्मिन् प्रजापतिर्वायुर्भूत्वाचरत् । स इमामपश्यतां वराहो भूत्वा ............. सा प्रथत सा पृथिव्यभवत्। ........... व्यक्तबिम्बीयविकासस्य नव्यक्रमस्य वैदिकमूलमत्र दृश्यते। अत्र विश्वस्य द्वैतक्रमोऽपि संकेतितः।

*(४) शतपथे याज्ञवल्क्यगार्गी सम्बादरूपेण–*

विश्वोत्पत्तिः संस्थानं च निरुपितम् । शतपथ ब्रा., १/४/६/६/१.

कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेत्यन्तरिक्ष लोकेषु गार्गीति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्चेत्यादयः ............। इत्यनेनाश्रयत्वमपिं ज्ञायते।

*(५) परमविराटपुरुषात् विश्वोत्पत्तिः –*

विराट्परमेश्वरस्य नाभ्यामन्तरिक्षं शीर्षे द्युलोकस्तथा पदभागे भूमिः श्रोत्रे दिग्विभागाः पुरुषसूक्ते वर्णिताः।

*नाभ्यामासीदन्तरिक्षं शीर्ष्णोद्यौः समवर्त्तत। पदभ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन्।।*

*द्युलोकस्येन्द्रेण धारणम्*

त्रिलोकाधिपतेरिन्द्रस्य महत्वं मिन्द्रेण द्युलोकस्य धारणं स्थिरत्वं स्थिरत्वात् कम्पनं कम्पनात् पिण्डानां वृत्तीयागतिश्च यथा – ऋ.सं., २/१२/२ तथा अथर्वसं. २०/३४/२ –

*यः पृथिवीं व्यथमानामदं हृदयः पर्वतान् प्रकुपितां अरम्णात्। योऽन्तरिक्षं विममे वरीयो यो द्यामस्तम्नात् स जनास इन्द्रः।।*

*सप्तोर्ध्वलोकानां संस्थानम् –*

*(६) लोकानां स्थतिवर्णनं जैमिनीयब्राह्मणे १/३३/४ –*

उपोदकः, ऋतधामा, अपराजितः, अभिद्युः, प्रद्युः, रोचनः विष्टपः (सत्यं नाम ब्रह्मलोकः)। अन्यत्र – उपोदकः, ऋतधामा, शिवः, अपराजितः, अभिद्युः, प्रद्युः, रोचनश्च – जैमिनीय ब्राह्मणे, ३/३४/७.

*विश्वोत्पत्तिः गतिश्च –*

(७) लोकोत्पत्तितः गतिपर्यन्तं शतपथस्य विधानं यथा– श.ब्रा., ११/८/१/२ –

तद् यथा ह वै । इदं रथचक्रं वा कौलालचक्रं वा प्रतिष्ठितं क्रन्देद एवं हैवेमालोका अध्रुवा अप्रतिष्ठिता आसुः । स ह प्रजापतिदीक्षाञ्चक्रे । कथन्विमेलोकाध्रुवाः प्रतिष्ठिताः स्युरिति। स एभिश्चैव पर्वतैर्नदीभिश्च इमाम् अदृहंद् वायोभिश्च मरीचिभिश्चान्तरिक्षम् । जीमूतैश्च नक्षत्रैश्च दिवम् ।। Cosmic cloud formation of hevenly bodies in the space and other formation indicated in the Shatapatha Brahman.

*(८) पौराणिकविधानम् विश्वोत्पत्तिः संस्थानं क्रमश्च –*

९. वायुपुराणम् – अ. ४९/१५०, पद्मपुराणम्, ७/२/१२, श्रीमद्भागवत्, २/५/३२, ४२, देवीभागवतम् स्कन्ध ८ पुराणपर्यालोचनम्, पृ. १७३. चतुर्दशलोकरहस्यम् – पृ. ९१०, प्रभृतिषु– चतुर्दशभुवनात्मकं ब्रह्माण्डं तदुत्पत्तिः संस्थानं विनाशकमश्च सम्यक वर्णितोऽस्ति।

*सप्तौर्ध्वलोकाः –*

सत्यं तपः जनश्च अकृतकत्रैलोक्यम् – अस्य सम्मती संज्ञा। जनः महः द्युलोकश्च कृतकाऽकतकत्रैलोक्यम् । अस्य क्रन्दसी

Vijnana Bharati

संज्ञा। द्युः भुवः भूश्च कृतक त्रैलोक्यमस्य रोदसी संज्ञा ।

*सप्तपाताललोकाः –*

सप्तपाताललोकाः – अतलः वितलः सुतलः तलातलः रसातलः महातलः पातालश्चेति।

वैदिकविज्ञानं भारतीय संस्कृतिश्चेति ग्रन्थे म.म. गिरिधरलालशर्मा चतुर्वेदी महोदयेन वैदिकविज्ञानस्य वैशिष्ट्यं सम्यक् प्रकाशितं सर्वतो भावेन।

*सप्तोर्ध्वलोकानांनिवेशः*

१.ॐ भूः २.ॐ भुवः ३.ॐ स्वः ४.ॐ महः ५.ॐजनः ६. ॐतपः ७.ॐसत्यंमिति

ॐ तपः ॐ सत्यम् ॐ तत्सवितुवरेण्यं .........

वा.सं. प्रमाणेन सप्तोर्ध्वलोकाः ज्ञायन्ते।

*सूर्यात् ग्रहोत्पत्तिः*

ब्रह्माण्डपुराणे – चन्द्रसहिताः ग्रहाः सर्वे विज्ञेयाः सूर्य सम्भवाः।। २४/४६ ।।

दितिस्तथादितिभ्यां काश्यापयोगेन देवासुरात्मक- द्युलोकीयविकासः – उत्तर ध्रुव दक्षिण

ध्रुवीयसंस्थानाम्यां द्युलोकादारभ्यभूपृष्ठान्तं विकासोऽपि संकेतितः ।

ऋ.सं. १०/१९० – तः काश्यपसंज्ञकात् प्रजापतिः सकाशात् द्युलोकस्य सूर्यस्य चोत्पत्तिः कथितः। परमेष्ठिसोमस्याहुत्या सूर्यादयः नक्षत्राणि च दीप्तानीति।

*ब्रह्माण्डाभ्यन्तरे चतुर्दश भुवनानां भूः भुवः स्वः क्रमेण वर्गीकरणम्*

१०. भूपृष्ठादारभ्य सत्यान्तं त्रैलोक्यत्रयमन्तरिक्षत्रयं च यजुर्वेद प्रमाणेन तथा ऋग्वेदप्रमाणेन ज्ञायते ।त्रिरन्तरिक्षां सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना। त्रिस्त्रो दिवः पृथिवीस्तिस्त्रः इन्वति त्रीभिव्रतैरभि नो रक्षतित्मणा।। ऋ.सं., ४/५३/५ ।।

विष्णुपुराणे, २/५/५ तथा ब्रह्माण्डपुराणे सप्तोर्ध्वलोकाः सप्तपाताललोकाश्च निरूपिताः। यथा –

*स्वर्लोकादपि रम्याणि पातालानीति नारदः।*

*प्राह स्वर्गसदोमध्ये पातालेभ्यो गतो दिवम्।।*

ब्रह्माण्ड पुराणम्, २१/४.

भूगोलेऽपि भूः भुवः स्वश्च त्रयः विभागाः भागवते भूगोलीय त्रैलोक्यस्य संकेतः प्राप्यते। यथा –

*अन्तराल एव त्रिजगत्यास्तु दिशि ।*

*दक्षिणस्यामधः स्याद् भूमेरूपरिष्ठाच्च जलात् ।।* भागवते, ५/२६/४-११. मध्यकालीन सिद्धान्तोऽपि भूपृष्ठे भूगोलीय त्रैलोक्यं निरूपितम् –

*भूर्लोकाख्यो दक्षिणे व्यक्षदेशात् –*

*तस्मात् सौम्योऽयं भुवः स्वश्च मेरूः।*

*लभ्यः पुण्यैः खे महः स्याज्जनोऽतोऽनल्या-*

*नल्पैः स्वैस्तवः सत्यमन्तः ।*।सि.शि.गो., ३/४३/७८.

*भूगोलीय पातालव्यवस्था –*

*... पाताललोकाः पृथिवी पुटानि।।*

*चञ्चत् फणामणिगणांशुकृतः प्रकाश*

*एतेषु सासुरगणाः फणिनो बसन्ति*

*दीव्यन्ति दिव्यरमणी रमणीय देहैः।*

*सिद्धाश्च तत्र च लसत्कनकावभासैः।*।सि.शि.गो.भु., श्लो. २३-२४

कणाः –Particales प्रतिकणाः – Antiparticales विकिरणाः – Radiations.

इति नव्यान्वेषणम् । पदार्थस्य विभागः द्वैतस्य वर्गीकरणमिति ।

*११. वैदिकसृष्टिविधानस्य संकेताः –*

को अद्धावेद क इह ......... यदि वा न वेद ।। ऋ.सं., १०/८१/४, १०/१२९/६, १०/१२/७-९, १०/७२/२,५,८ ; तै.ब्रा. १०/२/२४;

*सृष्टितः पूर्वकालिकस्थितिः –*

नासदासीन्नो सदासी तदानी ........... यस्मिन् विश्वानि भुवनानि तस्थुः ।। ऋ.सं. १०/१२९/१, १०/८/२-६; तै.ब्रा., २/ २/९/१; वे.वि. निदर्शन, पृ. ३८-३९; ऋषीत्येष गतौ धातुः श्रुतौ सत्ये श.ब्रा., ६/१/१/१, तपस्पथ बृहदारण्यक, २/३/१/४/ २, अध्याय ३, ब्राह्मण १-४ कण्डिका

सदसत् शब्दयोः स्पष्टीकरणं शतपथ ब्राह्मणे प्राप्यते। द्वेवाव ब्राह्मणोरूपे- मूर्तं चैवामूर्तं च। मर्त्यं चामृतं च । स्थितं च यच्च । सच्च त्यच्च । तदेवतन्मूर्तं यदन्यत् । वायोश्चान्तरिक्षाच्च।

Vijnana Bharati

एतन्मर्त्यम्। एतत स्थितम्। एतन् सन्। अथामूर्त्तम्। वायुश्चान्तरिक्षं च। एतत अमृतम्। एतत् यत् एतत् त्यम्। बृहदारण्यक, २/३/१-४,२.।

अत एव सगुण ब्रह्मसूर्यस्योपासना क्रियते। यथोक्तम् –

*स य एतमेवं विद्वानादित्यं ब्रह्मो इत्युपासते।* छान्दोग्य उप., ३/१९/१/४.

***विराडक्रमेण सृष्टेविकासः–***

तेजोमय महानण्डः (हिरण्यगर्भः) कथमुत्पन्न इति शतपथे आपो ह वा इदमग्रे सलिलमेवास। ता अकामयन्त। कथं नु प्रजाये महि इति। ता अश्राम्ययन्। तास्तपोऽतपयन्तः। तासु तपस्तप्यमानासु हिरण्यमयाण्डं सम्बभूव। तदिदं तावत् सम्बत्सरस्य बेलां यावत् पर्यप्लवत। ततः सम्बत्सरे पुरूषः समभवत् सः प्रजापति।। शतपथ ब्रा., ११/१/६/१-२.

डॉ. वासुदेवशरणअग्रवाल महोदयेन निरूपितं यत् तच्छलिलं समुद्रमिव गहनं गभीरं "अम्भ" आसीत्।

अदितिः – वरूण मित्र अर्यम्णः कणाः प्रतिकणाः विकिरणाश्च ब्राह्मीस्थितिः – मूलसत्ता। त्रिनाभिचक्रमजरमनर्वम् ....

आपः – त्रिवर्गी (वरुण मित्र अर्यम्णः) मूलतत्त्वानां क्रियाशीलावस्था, सलिलं माया, सोमस्यैव परिणामितरूपम्। बृहती आपः – अपां बृहद्रूपम्। मूलादूद्भुताः – आपः प्रारम्भिक तरलावस्था (ईर्टैं) प्रारम्भिकस्थितिश्च।

रिक्तः – नाभिबाह्यचक्रयोरन्तरालः। अपां न पात् – नाभिकी अवस्था (ण्देस्म श्ट्री) अर्धगर्भः – तन्मात्रावस्था नाभिकीयावस्था।

व्यक्तविश्वम्वादृश्यमानजगत्भूताद्यावस्था । "सप्तयुञ्जन्तिरथमेकचक्रमिति वैदिकप्रमाणेन व्याख्यानं जायते।

***विलक्षणसृष्टिक्रमः –***

***वैत्तियोपनिषदि – २-१-***

"सत्यं ज्ञानमनन्तं -ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति। तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशादवायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात् पुरूषः।।

वेदान्तसारेऽपि-१/२ तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः, आकाशाद् वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते।। प्रकृतिः नास्ति कथमप्यचेतना यथा देवी भागवते १-८-४ तथा १-८-२, रजः सत्त्व तमोभिश्च संयुताः कार्यकारकाः।। विष्णुपुराणे, १/४/४

*नारायणः परोऽचिन्त्यः परेषामपि स प्रभुः।*
*ब्रह्मस्वरूपो भगवाननादि सर्वसंभवः।।*

लिङ्गपुराणे, ८/३/३

*सर्वलोकैक संहर्ता सर्वलोकैकरक्षिता।*
*सर्वलोकैक निर्माता पञ्चब्रह्मात्मकः शिवः।।*

देवीभागवते, ३/३.

*एषाभगवतीदेवी सर्वेषां कारणं हि नः।*
*महाविद्या महामाया पूर्णप्रकृतिरव्यया।।*

विष्णुपुराणे, १/२/६६

*सृष्टिस्थित्यन्त करणीं ब्रह्म विष्णुशिवात्मिकाम्।*
*स संज्ञां याति भगवानेक एव जनार्दनः।।*

भारतीयसृष्टिविद्यायाम्, पृ. ८६

***व्यक्तविश्वस्वरूपम् –***

***प्रकृतिः महदहंकारतन्मात्राणि च चतुर्भुजो विष्णुः।***
***धर्मज्ञानवैराग्यमैश्वर्यं च चतुराननः ब्रह्मा।***
***पञ्चमहाभूतानि पञ्चाननानि शिवस्य।***
***पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि दशभुजाः शिवस्य।***

अम्भः किमासीत्? गहनं गभीरम्। अस्य सामान्यत्वं नापि तु मातृशक्तिरूपेण सर्वतत्त्वात्मकं रूपमेवासीत्। अतः कथितम्–

***हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।।*** ऋ.सं., १०/१२/१/१;

हिरण्याण्डस्य तिस्मः गतयः। १. पर्यप्लवनम् (अक्षभ्रमणम्), २. प्रसर्पणम् गतिशीलत्वम्, ३. समेषणम् – तेषाभूर्मयः गतिश्च। केन्द्रीकरणं च। श.ब्रा., ११//१/६/१-२.

प्रजापतिवर्ग इदमेक आसीत्। ***नाहरासीन्न रात्रिरासीत् सोऽस्मिन्नन्धे तमसि प्रासर्पत्।।*** तै.ब्रा., २/१/४.

आपो वा इदमग्रे ............ त उर्मयः समान्यन्तफालफलिति। तद् हिरण्ययाण्डं समैषत्।

एवं हिरण्यगर्भः समवर्त्तताग्रे .......... पृथिवीं द्या मुते

Vijnana Bharati

माम्।। ताण्डय ब्रा.,१/१/१२,

वैदिक एवं ज्योतिषे सृष्टिस्थितिसंहारसम्बद्धाः सिद्धान्ताः सम्यक् निरूपितास्ते हि पश्चात् विभिन्न दर्शनेषु सभाष्यं संगृहीताः।

ताण्डय ब्रा., १/५/४८; जै.उ., १/३७/२; शत.ब्रा., १४/१/४/२१; ता.ब्रा., ११/१/१; ब्रह्मसूत्र, १/३/१०; *''अक्षरमम्बरान्तत्ते:''* सांख्यकारिका, श्लो. २२

मूलप्रकृतिविकृतिः महदाद्याः प्रकृतिर्विकृतयः सप्त। षोडशकस्तु विकारो न प्रकृति न विकृतिः पुरूषः। एवं सिद्धान्तरूपेण ये संकेताः वैदिकवाङ्मये प्राप्यन्ते ते हि सम्प्रति प्रकृत्याश्रयेण पल्विताः पुष्पिताश्च भवन्ति। अस्य विस्तारस्त्वग्रिमखण्डे द्रष्टव्यः।।

*सिद्धान्तज्योतिषे भास्करेण –*

यस्मात् क्षुब्धप्रकृतिपुरूषाभ्यां महाऽनस्य गर्भेहंकारोऽभूत खकशिखिजलोर्व्यस्ततः संहतेश्च। ब्रह्माण्डं यज्जठरगमहीपृष्ठ-निष्ठाद्विरञ्चेर्विश्वं शश्वजयपति परमं ब्रह्म तत् तत्त्वमाद्यम् ।।

सि.शि. भुवनकोश, श्लो. १.

अत्र तैत्तिरीयसंहिता सांख्यदर्शनं वेदान्तश्च मयाणां निष्कर्षाः सन्ति

*वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ।*
*त्रिविधोऽयमहंकारो महत्त्वत्वादजायत।।*
*तैजसादिन्द्रियाण्याहुर्देवा वैकारिकादश।*
*एकादशं मनश्चात्र देवा वैकारिकाः स्मृताः ।।*

सांख्यदर्शने विश्वोत्पत्तिः –

सांख्येऽव्यक्तस्य जगत्कर्त्तृत्वं पुरूषसन्निधानेन यथा –

*अचेतनापि प्रकृतिः प्रगाढमात्मोपकण्ठे सकलं तनोति ।*
*अचेतनं संचलतीव लोहं स्वयं यथा भ्रामकसंन्निधाने ।।*
*वत्सविवृद्धि निमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।*
*पुरूषविक्षोभनिमित्तं प्रवर्त्तते तद्वदव्यक्तम् ।।*
*मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति विकृतयः ।*
*षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरूषः ।।*

*''पुरूषस्तु पुष्करपलाशवन्निर्लेपः''* इत्युक्तं च सांख्ये। सांख्यकारिका, ३/२२.

ऋ.सं., १०/१२१/७ – हिरण्यगर्भोत्पत्तिः –

*''आपो ह यद् बृहतीर्विश्वमायन्गर्भं दधाना जनयन्ती रग्निम्।*

वैदिक सृष्टि उत्पत्ति रहस्य, पृ. ११३, डॉ. विष्णुकान्त वर्मा

अग्रे आदिसृष्टिकाले सर्गारम्भे गर्भं दद्याना अभ्यन्तरे वर्तमाने बृहतीरापो प्रकृतेरवस्था विशेषो बृहदाकारं विश्वमग्निमग्निमयं पिण्डं जनयन्ती प्रकटी कुर्वन्ति, ततो ह पिण्डमुच्यते हिरण्यगर्भः।

*भास्करीय ब्रह्माण्डसंस्थानम् –*

*भूभूधरत्रिदशदानवमानवाद्या,*
*ये याश्च धिष्ण्यगगनेचरचक्रकक्षाः ।*
*लोकव्यवस्थितिरूपर्युपरि प्रदिष्टाब्रह्माण्ड-*
*भाण्डजठरे तदिदं समस्तम्।।* सि.शि.गो.भु.,श्लो. ६६.

*ब्रह्माण्डोत्पत्तिक्रमः –*

१. विराटपुरूषात् ब्रह्माण्डोत्पत्तिः – पुरुषसूक्तम्, १/९०; वा.सं., ३१/२; अ.सं., १३/१.

२. ब्रह्मणः सकाशात् ब्रह्माण्डोत्पत्तिः – ऋ.सं., १०/१२१/३, १०/१९०/३.

३. विश्वकर्मणः सकाशात् ब्रह्माण्डोत्पत्तिः – ऋ.सं., १०/८१/८२, १०/१२९/७.

४. प्रजापतिक्रमात् ब्रह्माण्डोत्पत्तिः – य.सं., १३/४, ४०/८, ऋ.सं., १०/१२१/१, १/१२१/१–७. इति प्राचीनक्रमः – नव्ये तु १. स्थिरदशासिद्धान्तः – २. विस्फोटसिद्धान्तः – ३. स्पन्दनशीलसिद्धान्तः –

तै. उपनिषद्, २/१; वेदान्तसार, १/२; सू.सि.भूगो., श्लोक १२–२५; विष्णुपुराण, १/४/४; लिङ्गपुराणम्, ८/३/३; देवीभाग., ३/३; ब्रह्मवैवर्त्त, १/१/४; विष्णुपुराण, १/२/६६; देवीभागवत, १८/४, १८/२; मार्कण्डेयपुराण, ४६/१८; वायुपुराण, ५/१/७ इत्यादिषु सृष्टिक्रमादारभ्यस्थितिपर्यन्तं विषयानां विश्लेषणं सम्यक् कृतमिति।

*नक्षत्राणां निधनम् –*

*नक्षत्राणां विनाशस्य दृष्टान्तोऽपि प्राप्यते।*
*सहस्रं यत्तु रश्मीनां सूर्यस्येह विनश्यति ।*
*ते सप्तरश्मयो भूत्वा एकेको जायते रविः ।।*
.................................................
*निर्दग्धेषु च लोकेषु तदा सूर्यस्तु सप्तभिः ।।*



Vijnana Bharati

ब्रह्माण्डपुराणे., ४/१२/३, १/१२४/१३० ।

*लयसिद्धान्तः –*

नित्यप्रलयः दैनन्दिनप्रलयः नैमित्तिकप्रलयः – ब्राह्मलयः – ब्रह्मदिनान्ते, आत्यन्तिकप्रलयः – सम्पूर्णप्रलयः – यथा – सि.शि.भु. वनकोशे ६२ से ६५ –

*विष्णुपुराणेऽपि चतुर्विधलयः प्राप्यते ।*

*नैमित्तिक; प्राकृतिकस्तथैवात्यन्तिको द्विज।*

*नित्यश्च सर्वभूतानां प्रलयोऽयं चतुर्विधः ।।*

विष्णुपुराणम्, १/७/४१.

नित्यलयः –

*नित्यो यः प्राणीनां लयः सदा विनाशोजातानाम् ।।*

अग्निपुराणम् –

*नित्यः सदेव भूतानां यो विनाशो दिवानिशम्।।*

विष्णुपुराणम्, ७/४३

प्राकृतिकलयः –

*वृद्धिर्विधेरहिनभुवः समन्तात् – स्यादयोजनं भूभवभूतपूर्वैः।*

*ब्राह्मेलये योजनामात्रवृद्धेर्नाशो भुवः प्राकृतिकेऽखिलायाः।।*

सि.शि.गो. भुवन, श्लोक ६२.

नित्यलयः – जीवानां दैन्दिनलयः –

*दिने दिने यन्म्रियते हि भूतै- दैनन्दिनं ते प्रलयं वदन्ति।*

ब्राह्मलयः – ब्रह्मदिनान्ते भूतानां लयः –

*ब्राह्मं लयं ब्रह्मदिनान्तकाले, भूतानि यद्ब्रह्म तनुं विशन्ति।।*

*प्राकृतिकलयः – महाप्रलयः –*

*ब्रह्मात्यये यत्प्रकृतिं प्रयान्ति, सर्वाण्यतः प्राकृतिकं कृतीन्द्राः।*

*लीलान्यतःकर्मपुटान्तरत्वात्, पृथक् क्रियन्ते प्रकृतेर्विकारैः।।*

आत्यन्तिकलयः – सम्पूर्णलयः –

*ज्ञानाग्निदग्धखिलपुण्य पापा, मनः समाधाय हरौ परेशे।*

*यद्योगिनो यान्त्य निवृत्तिमस्मादात्यन्तिकं चेतिलयश्चतुर्धा।।*

सि.शि.गो.भु., श्लो. ६२-६५

ब्रह्मदिनान्तादग्रे ब्रह्मा शेते द्वितीय–दिवसारम्भात् पुनः द्वितीयसृष्टिक्रमः–प्रवर्तते। यथा विष्णुपुराणे –

*एष नैमित्तिको नाम मैत्रेयः प्रतिसंचरः । निमित्त तत्र यच्छेते ब्रह्मरूपधरो हरिः ।।*

विष्णुपुराणे, ६/४/७,

*ब्राह्मरात्र्यावसानात् पुनः सृष्टिः प्रवर्त्तते- ततः प्रबुद्धो रात्र्यन्ते पुनः सृष्टिं करोत्यजः।*

विष्णुपुराणे, ६/४/१०

वायुपुराणेऽपि, ५/१०/१०० तः १३५ विशिष्ट वर्णनं प्राप्यते। ब्रह्मदिनान्ते जनः तपः सत्यं च न नश्यति। केवलं भूर्भुवः स्वश्च जीवादिभिः रहितो भवति।

विष्णुपुराणे लयस्य स्पष्टवर्णनमपि प्राप्यते यथा – ६/३/२९ –

*चतुर्युगसहस्रान्ते क्षीणप्राये महीतले । अनावृष्टिरतीव जायते शतवार्षिकी ।।*

*तत्रःस्सभगवान् सूर्यो तप्तास्सप्तसुरश्मिषु । स्थितः पिवत्यशेषाणि जलानि मुनिसत्तम् ।।*

*तएवरश्मयःसप्तजायन्तेसप्तदिवाकराः। दहन्त्यशेष त्रैलोक्यं सपातालतलं द्विज ।।*

*शेषाहि श्वाससंभूताः पातालानिदहन्त्यथः । तस्मादपि महातापतप्तालोकात्ततः परम् ।।*

*गच्छन्ति जनलोकं ते दशावृत्या परैषिणः । त दग्ध्वा जगत्सर्वं रूद्ररूपी जनार्दनः ।।*

*मुखं निश्वासजान्मेघान्करोति मुनिसत्तम् । उत्तिष्ठन्ति तदा व्योम्नि घोरास्संवर्त्तकाघनाः।।*

*वर्षन्ति ते महामेघावर्षानामधिकं शतम् । मुखनिश्वासजो विष्णुर्वायुस्ताज्जलदां स्तताः ।।*

*नाशयत्यतिमैत्रेयवर्षाणामपरंशतम् । एकार्णवस्ततः तस्मिन् शेषशय्यागतः प्रभुः ।।*

*ब्रह्मरूपधरश्शेते भगवानादिकृद्धरिः । पद्मयानोर्दिनं यत्तु चतुर्युग सहस्रवत् ।।*

*एकार्णवी कृते लोके तावती रात्रि रिश्यते।।* वि.पु. ६/३/२९, ३० तः ४०, ६/४/१,२,३,४, ६/३/७ तः ९.

*महाप्रलयः –*

ब्रह्मणः परमायुषान्ते यः लयः तस्य महाप्रलय इति नाम। तदैव ब्रह्माण्डस्यापि विनाशो भवति । तत्र भूर्जले, जलं तेजसि, तेजोवायौ वायुराकाशे, आकाशस्तु-अहंकारे अहंकारः महतत्त्वे महत्तत्त्वं प्रकृतौ लीयते। एवं सकलभुवनलोका अक्षीणपुण्यपापाः अव्यक्ते विशन्ति। अर्थादत्रापि – सांख्योक्त २५ अविनाशिनस्तु सूक्ष्मतमत्वेनाव्यक्ते विशन्ति ।

पुनः यदा भगवान परमाव्यक्तपुरूषः



Vijnana Bharati

"यस्योदावर्तित्वेनानन्तब्रह्माण्डानि सन्ति" सिसृक्षुर्भवति तदा प्रकृतिस्थक्षोभेन परमव्यक्तात् जलबुद्बुद्वत् – ब्रह्माण्डानि पूर्व संकेतित क्रमेण प्रवर्त्तन्ते। पाराशरेण विष्णुपुराणे जगदुत्पत्तिकारणं प्रधानकारणीभूता यतो वैसृज्य शक्तय इति। सृज्य शक्तय स्तत्कर्मणि तान्येव सृष्टौ मुख्यं कारणमिताराणि निमित्तकारणानि। भास्करेणापि सि.शि.गों भु.वा.भा. श्लोक ६२ तः ६५

*नाभुक्तं क्षीयते कर्म कल्पकोटि शतैरपि।*

*नहयात्मनां भवति कर्मफलोपभोगः कायाद्विनेत्यादि ....।।*

*अतः महाप्रलये चतुर्दशभुवनात्मकं ब्रह्माण्डं लयं प्राप्नोति।*

*अव्यक्तं व्यक्तं च द्विविधं विश्वरूपम् ।*

*कालस्यापि व्यक्तमव्यक्तं च द्विविधत्वमेव ।*

*महाकाशमहाकालयोरपि ब्रह्मणि लयः ।*

*योगिनी तन्येऽस्य विशिष्टविधानं प्राप्यते।*

वि.पु., ६/४/१२ तः ५०, १/३/२६, ६/४/१५ तः ४५, ६/४/४६-४८, १/७/४३, १/७/४१, ६/३/४, भागवत, १२/४, मार्कण्डेयपु., ४०, वा.पु., १०/२, मत्स्य. २४७, अग्नि., ३६८, १८०:२७, गरुड, १/२/६/९, अग्नि., २६८/१ तः २, गरुड, १/ २१६/१, १/२१७/१.

*एतेषुं सृष्टिस्थितिलयानां चक्रात्मकं रूपमेव संकेतितं ऋषिभिः।*

*विष्णोः द्विपरार्धप्रमितं दिनं तन्मिता रात्रिश्च निरूपिता।* यथा – वि.पु., ६/४/४६ –

*..... द्विपरार्धात्मकः कालः कथितो यो मया तव ।*

*तत्रस्थिते निशाचारस्तस्य तत्प्रमाणं महामुने: ।।*

वस्तुतोऽयं विषयः विस्तृतोऽस्ति। कथं प्राचीनैः विभिन्न विश्वरहस्यमवगतमित्यपि गहन एव। ये प्राचीनसंकेताः प्राप्यन्ते तेषु केचन हि सम्प्ररि समुद्घाटिताः सन्ति। पराः युक्तिविधानं शिल्पविधान मतीन्द्रियक्षमतावर्धकविधानानि संसाधनानि विभिन्नकालखण्डेषु विभिन्नरूपकाण्येव आसन् ।

निष्कर्षः –

*विराटपुरूषादेव विश्वोत्पत्तिः महाब्रह्माण्डोत्पत्तिः –*

प्रथमक्रमः – पुरुष एवेद सर्वं यद्भूतं यच्चभाव्यम् । य.सं. पुरुषसूक्ते १/९०, यजु.सं. ३१/२; अथर्व.सं. १३/१. अत्र अनन्तब्रह्माण्डानां महाब्रह्माण्डात्मकात्परात्परात् विश्वोत्पत्तिक्रमः संकेतितः ।

*ब्रह्मणः सकाशात् ब्रह्माण्डोत्पत्तिः –*

द्वितीयक्रमः – ऋग्वेदीय नासदीयसूक्तप्रमाणेन ज्ञायते यत् ब्रह्माण्डस्यास्तित्वं तद्बोधकं किमपि नासीत्। सृष्टितः पूर्वं न सदासीत्। न असदासीत्। आकाशादीनां तु का कथा। पिण्डाभावेनाहोरात्र्यादीनामस्तित्वमपि नासीत्। केवलं ब्रह्मण एवाव्यक्त सत्ता आसीत्। ब्रह्मणः संकल्पमात्रेण सृष्टिप्रारब्धा। ........... तम आसीत्तपसा मूलहमग्रेऽप्रकेतं सलिलं सर्वमा इदम्। ........... ऋ.सं., १०/१२९/३, १०/१९०/३.

तृतीयक्रमः – प्रजापतिभ्यो व्यक्तविश्वस्य प्रवर्त्तनम्। स्वयंभूः परमेश्वरः ब्रह्मा सर्वप्रथमं व्यक्तसृष्ट्यर्थं प्रजापतिनसृजत्। प्रजापतिक्रमादेव विश्वस्य व्यक्तविस्तारोजातः। हिरण्यगर्भः प्रजापतित्वेन स्वीकृतः। हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। ............ कस्मै देवाय हविषा विधेम् ।। य.सं., १३/४ एवं ४०/८, ऋ.सं., १०/१२१/९, १/१२१/१ तः ७ – इत्यतः हिरण्यगर्भक्रमात् – व्यक्तविश्वस्यप्रवर्त्तनं जातमिति।

*विश्वकर्माणा द्युलोकीय विकासः –*

इयं विसृष्टियत् आबभूव ........... यदि वा दधे यदि वा न। योऽस्याध्यक्षः परमे व्योमनसौ अङ्ग वेद यदि वा न .......... वेद ।। ऋ.सं., १०/८१-८२, १०/१२९/७ एवं परमेश्वरात् ब्रह्मा, ब्रह्मणः सकाशात् प्रजापतयः प्रजापतिभ्यो देवादयः देवेभ्यो व्यक्तविश्वं चराचरं च निर्मितम्।

अविनाशिभिः पञ्चविंशतितत्त्वैः सृजनं जातं तत्र ण्देसम्ल्रू तथा ऋत सत्यादीनां, सदसदादीनां ब्रह्मस्पतेः रेतसः संयोगादिभिः सर्वविधं चराचरं निर्मितमिति। वायुरूपस्य तेजरूपस्य सोमरूपस्योत्पत्तौ च संकेताः क्रमिकविकासाश्च ऋषिभिः कृता एव। तेषां व्यक्तीकरणं संघीयान्वेषणेन कथं स्यादिति विचारणीय एव।

*नव्यनिष्कर्षः –*

*फ्रेडहायल महोदयस्य स्थिरदशासिद्धान्तः –*

अस्य मते ब्रह्माण्डस्य चिरकालादस्तित्वं विद्यते। अनन्तकालात् प्रसरणशीलत्वेऽपि आकाशगंगामध्ये रिक्तस्थाने हाइड्रोजननामक कयव्यकणानामुत्पत्तिः स्वयमेव जायते। ते गैसकणाः मध्यस्थरिक्ततां पूरयन्ति। अनेन प्रकारेण ब्रह्माण्डं सततं प्रसरति। आद्यन्तहीनोऽयं ब्रह्माण्डोऽनन्तो चिरकालं यावत् स्थास्यति। अतः कुतः हाइड्रोजन (सोम) तत्त्वमुत्पद्यते तथा आद्यन्तहीनत्वेऽपि प्रसारस्य सीमा का इति न स्पष्टतः साधितः।

Vijnana Bharati

*रायलमहोदयस्य विस्फोटसिद्धान्तः –*

अस्य मते १००० कोटिवर्षाणि पूर्वमत्यन्तसधनपदार्थानां मध्ये महता विस्फूरणेन आकाशगंगानां नक्षत्रामुत्पत्तिर्जाता। सर्वे विस्फूरणादनन्तरं केन्द्रात् परिधिं प्रति प्रसरन्ति। ब्रह्माण्डे प्रसरणशीलता विस्फूरणादुत्पद्यते। यदा प्रसारस्यावरोधस्तदा सर्वे गोलीयपिण्डाः परस्पराकर्षणेन विनष्टाः भविष्यन्ति। तादेवकालः ब्रह्माण्डस्य विनाशकालः। अत्रापि महागोलकः कुत्रः समागतस्तथा तत्रस्थानि तत्त्वानि कुतः समागतानिति विभिन्नप्रश्नाः न सर्वथोत्तरित्ताः।

*३. स्पन्दनशीलसिद्धान्तः*

अत्र निरूपितं यत् विस्फूरणादनन्तरं महागोलकस्य तत्त्वानि प्रसरन्ति। प्रसरणस्य परमत्वे पुनः ब्रह्माण्डस्य संकोचनं महागोलकत्वं पुनः विस्फूरणं सरणं चैवमविरलत्वेनोत्पत्ति विनाशौ प्रचलतः । विस्फोटादनन्तरमेकसहस्त्रकोटिवर्षाणि प्रसारस्य विलोमगणनया निर्धारितानि। परन्तु आईस्टाईन प्रमाणेनापि कियन्मितं भवति विश्वस्य सृष्टिस्थितिसंहारकानन्तचक्राणां निदानमिति वैदिकसंकेतेन संयोज्य खगोलवैज्ञानिकैः सर्वथा संघीयान्वेषणेण विमर्शणीय एव। दिग्देशकालानां त्रिविधत्वे सापेक्षिकत्वं वर्त्तते । विश्वं द्विविधं स्थूलं सूक्ष्मं च। सूक्ष्मविश्वे विद्युत्कणाः सन्ति। परमाणुभिः पदार्थाः जीवाभुभिः जैवविश्वं प्रवर्त्तते। तत्र परमाणोः इलेक्ट्रोन प्रोटोन न्यूट्रान इति त्रयः विभागास्तथा एण्टी इलेक्ट्रोन एण्टीप्रोटोन इण्टीन्यूट्रोन इति विभागाः नव्यैः कृताः। अत्र प्रोटोनस्यधनत्वं इलेक्ट्रोन" इत्यस्य ऋणत्वं न्यूट्रोन इत्यस्य शून्यत्वं विद्यते। एतेषां सूक्ष्मतमकणानां संख्याविभेदैः विभिन्न मूलद्रव्याणामुत्पत्तिः। तापक्रमोत्पीडनयोः परिस्थितिभेदेने विभिन्नमूलतत्त्वानामुत्पत्तिर्जायते। स्थूलविश्वं परमाणूनां संचयनमेव। वैशेषिकदर्शनेऽथर्ववेदे यद्यपि परमाणोः संकेतः स्पष्टतः प्राप्यते परं नव्यक्रमः सुव्यवस्थितो जातः । सूक्ष्मविश्वे- विद्युच्चुम्बकक्षेत्रस्यादृश्यतरङ्गाः सन्ति। गुरूत्वाकर्षणक्षेत्रेषु ग्राह्यपदार्थविशेषाः द्रव्यरूपाः। मूर्तद्रव्यस्य तिस्रोऽवस्थाः सन्ति। वायव्याः- धूमवाष्पादयः तरलाः जलादयः दृढाः मृत्पाषाणादयः।

उपर्युक्त समीक्षणेन वैदिकसिद्धान्तस्य पूर्णत्वेऽपि नव्यक्रमेण संयोज्य संघीयान्वेषणेन यथार्थनिर्धारणस्य प्रयोजनमस्ति। आकाशगंगाः - वाष्पमयाः। नव्यग्न्वेषणेन ब्रह्माण्डे १०" सहस्त्रार्वुदाः – आकाशगंगाः निर्धारिताः । प्रत्येकाकाशगंगायां १०" सहस्त्रार्बुदाः तारकाः सन्ति। आकाशगंगायां स्वकीयसौरपरिवारः बिन्दुरूपेण तस्या केन्द्रात् ३००० प्रकाशवर्षदूरत्वेन विद्यते।

आकाशगंगायाः व्यासः १००००० प्रकाशवर्षाणि सन्ति। दीर्घवृत्तीयाः सर्पाकाराः विषमाकाराश्चाकाशगंगायाः स्वरूपाणि।

*नीहारिकाः – नक्षत्राणि सौरमण्डलं ग्रहाश्च –*

आकाशगंगायामेव नीहारिकाः सन्ति। कथमाकाशगंगायामेव सर्पिल नीहारिका केन्द्रे नक्षत्राणामुत्पत्तिः तारकाणां तापक्रमः प्रभृतयो विषयाः दूरदर्शकसहाय्येन १० कोटितोऽधिकनीहारिकाणामभिज्ञानं सौरपरिवारस्याभिज्ञानं सौरमण्डलस्योत्पत्तौ काण्टस्य नीहारिकासिद्धान्तः लाप्लस वाइजेकरादीनामपि कुइवरस्यापि तथा अल्फवेनस्य विद्युच्चुम्बकीयसिद्धान्तः श्मिड महोदयस्योल्कापिण्डसिद्धान्तश्चेति (Unitormitaisan and unipasental Hypothesis) एकपैतृकपरिकल्पना माध्यमेन सौरमण्डलस्योत्पत्तिः कश्चिदेकस्यैव महत्पिण्डस्य स्वाङ्गभ्रमणेन मन्दक्रमिकपरिक्रमणेन विकासेन बभूव।

प्रलयवादीद्विपैतृकपरिकल्पना –सिद्धान्तस्य परिकल्पनया सौरमण्डलं द्वयोस्तारकयोर्मध्ये संघर्षण विस्फोटयोः प्रलयकारिपरिणामेनोत्पन्नमिति।

*अस्मिन् वर्गे –*

१. बफनमहोदयस्य - संघर्षणभ् -

२. चेम्बरलेन - ग्रहाणुः -

३. जीन्सजेफ्रीज - ज्वारीय

४. रसेल तथा लिटिलिटिनयोः - युग्मतारा

५. रागसन - विखण्डन -

६. ए.सी. बनर्जी - सिफीड

७. फेडहायल - नवतारापरिकल्पना -

*१. संघर्षण* – विशालकायधूमकेतोः सूर्येण घोर संघर्षणेन सूर्यांशाः केत्वंशाश्च निःसृत्य सुदूरमगच्छन्। तयोः सूर्यांश केत्वंशयोः संमिश्रणांशैः सौरपरिवारस्योत्पत्तिः। अत्र विशालधूमकेतोः स्थाने विशालकाय नक्षत्रमपि केचन स्वीकुर्वन्ति।

*२. ज्वारीयपरिकल्पना* – संघर्षणसिद्धान्तस्य परिस्कारस्रूपेणकाचित् तारा परिभ्रमन् सूर्यसमीपे समागता। परिभ्रमणेन सूर्यात् समागताच्च नक्षत्रात् ज्वारोत्पत्तिः संजातः। कालान्तरे समागतनक्षत्रं बहिस्थं जातम्। समुत्पन्न ज्वारपदार्थाः

मध्यस्थाः सूर्यस्याकर्षणेन बद्धाः ग्रहाः संजाताः।

**३. *युग्मतारापरिकल्पना*** – काचित् तारा सूर्यमभितः भ्रमणशीलायुग्मतारा नवागन्तुकस्य प्रबलाकर्षणेन बहिर्भूताविखण्डिता च वायव्यत्वेन सूर्यमभितः प्रसारिता। यदा नवागन्तुकतारा स्वपथेऽगच्छत्तदा वायव्यपदार्थाः सूर्याकर्षणेनाबद्धाः भ्रमणशीलाः कालान्तरेण ग्रहाः जाताः ।

**४. *नवतारापरिकल्पना*** – फ्रेडहायलमते तु सूर्यस्य समीपे सुपरनोवातारके विस्फोटोजातः। तस्य विस्फोटस्य परावर्त्तनशक्त्या सुपरनोवा तारकस्य केन्द्रभागः बहिर्गतः । तत्रावशिष्टाः वायव्यपदार्थाः गैसीयमेघाः सूर्यं परितो भ्रमन् कालान्तरेण सौरसदस्याः संजाताः ।

एवं नीहारिका ग्रहाणुपरिकल्पनयोर्मध्येऽन्तरम् –

***नीहारिकापरिकल्पनया –***

१. सौरपरिवारस्योत्पत्तिः सूर्यादेव जातः ।

२. प्रारम्भे गैसीयवायव्यपदार्था आसन् ।

३. प्रारम्भे-उष्णावस्था आसीत् ।

४. तापमानं क्रमशः न्यूनतामभजत् ।

५. आद्यावस्थायां वायुमण्डलमासीत् ।

***ग्रहाणुपरिकल्पनया –***

१. सूर्येण सह नवागन्तुकनक्षत्रेण संघर्षणात् सौरपरिवारस्योत्पत्तिः।

२. ग्रहाणवः प्रारम्भे कठिनावस्थायामेवासन् ।

३. प्रारम्भे शीतलाऽवस्था आसीत् ।

४. तापक्रमः क्रमशः वर्धितः ।

५. प्रारम्भे वायुमण्डलं नासीत् ।

एवं नव्यसंकल्पनायामनेके पक्षाः सिद्धान्ताश्च सन्ति। नव्यत्वेन ‘ैंहु ेदपदेबे जेंहगु ठहग्नो’ स्वीकृत्य नव्याः तुष्टाः सन्ति परं वैदिकतत्त्वं सम्प्रत्यपि निर्दुष्टत्वेऽपि नव्यान्वेषणेन सर्वतो भावेन प्रत्यक्षं भविष्यतीति मे विश्वासः ।

***वैदिकवाङ्मये सूर्यस्य सौरपरिपारस्योत्यत्तिविषये –***

ऋ.सं., १/११५/१.

***चित्रं देवानामुदगादनीकं चक्षुमित्रस्य वरूणस्याग्नेः।***
***आप्रा द्यावापृथिवी अन्तरिक्षसूर्य आत्मा जगतस्तस्थुषश्च ।।***

शतपथ ब्रा., ६/१/२/३.

सोऽकामयत् । भूय एव स्यात्तं प्रजाये तेति। .......... स वायुनान्तरिक्षं मिथुनं समभवत् । तद् अण्डं समवर्त्तत। तद् अभ्यमृशद् यशोबृहतीति । ततोऽसावादित्योऽसृज्यत। एष वै यशः । यदश्रुसंक्षरितमासीत् सोऽक्ष्मा पृश्निरभवत् । अश्रुरहं वैतमश्मा इत्याचक्षते। .......... अथ य कपाले रसो लिप्त आसीत् । ते रश्मयोऽभवन् । अथ यत् कपालमासीत् सा द्यौरभवत् ।। अतोऽग्निसोमात्मकं जगदिति न्यूनांशयोगनिष्पत्या सूर्यादयो संजाताः । विज्ञानविद्युत् नामके ग्रन्थे – विद्यावाचस्पति मधुसूदन झा महोदयेन विश्वोत्पत्तिः संस्थानं परिभ्रमणं तत्त्वात्मक संरचनामवलम्ब्य यथार्थ समीक्षणं कृतं परं तत्रापि प्रायोगिकानुशीलनस्य प्रयोजनं विद्यते। टि.१.

१. वैदिकब्रह्माण्डसंस्थानं प्रभावविधानं च

२. अथर्ववेदोक्तं ब्रह्माण्डनिरूपकस्कम्भ सूक्तस्य वास्तुशास्त्रं ज्योतिषञ्चेति निरूपणं तथा

३. भारतीयसृष्टिसिद्धान्तः

४. ज्योतिषस्य स्वरूपं चेति चतुभिः शोधनिबन्धैस्सहास्य प्रबन्धस्य महत्त्वं प्रयोगार्थमाधाररूपं भविष्यतीति सर्वेप्रबन्धाः क्रमशः नियोज्याः ।

कौत्सब्राह्मणे सौरविज्ञानं सम्यक् विश्लेषितं दृश्यते।

कौ.ब्रा., ५/८ – असौ वै सूर्यो योऽसौ तपति।

ब्रह्माण्डपुराणे – यश्चासौ तपते सूर्यः, पृ. २४-११, तथा ब्र.पु., २२/२० – सूर्यादुष्णं निस्रवते- सोमाच्छीतं प्रवर्त्तते। स सूर्यस्तपति सूर्याच्चोष्मा प्रभवति। एवं ब्र.पु., २४/१७ तः २३, २१/५७,

वि.पु., २८/११ तः २५ सूर्यविज्ञानं सम्यक् विश्लेषितम्। सूर्यस्यनिधनम् – ब्र.पु., पू. ५/१२३,१२४,१३०, २४/४९

ताराभौतिकी- नक्षत्राणां संरचनोत्पत्ति निधनादयः सम्यक् विश्लेषिताः ।

शुक्रस्यवर्णनम् – ब्र.पु.,पू. २३/८१ से ८३।

पृथिवी- आग्नेयीपृथिवी – ताण्डय ब्राह्मण, १५/४८।

आग्नेयोऽयं लोकः – जैमिनीयोपनिषद्, ९/३७/२।

अग्निगर्भापृथिवी – शतपथ ब्रा. १४/४/४/२१।

चन्द्रः – श.ब्रा., ६/१/२/४, ऐ.ब्रा., ४०/४. तै.आ., ३/१२, ऋ.सं., १०/९०/१०, वायु.पु., १/५३/२८, ब्रह्माण्ड., १/२४/१३०।



Vijnana Bharati

भौमः – ब्र.पु.,पू. २४/४८, वा.पु., ५३/४८, वि.पु., २/१२/१८, ब्र.पु., २३/८४ तः ८५।

गुरूः – ब्रह्माण्ड पु., २३/८५, ऋ.सं., ४/५०/४, अ.सं., २०/८८/४, वि.पु., २/१२/१९, तै.ब्रा., ३/१/१।

शनिः –वायुपु., १/५३/४९, ब्रह्माण्ड, १/२४/४९ तः ५०।

धूमकेतवः – अ.सं. १०/६/१०, ऋ.सं., ५/११/३, ब्रह्माण्डपु., १/२४/१३९।

उल्का – अ.सं., १९/९/७।

पृथिव्या आवरणानि – मनुस्मृतिः, १/२६, वायु.पु., १९/१६३, महाभारते शान्ति, ३२८/३६ से ५२, ब्रह्माण्डपुराणे, १/२१/२५ तः २७, १/२२/३९ तः ५०, एवं विभिन्न सन्दर्भाः सृष्टिस्थितिसंहारसम्बद्धाश्च निष्कर्षत्वेन वैदिक वाङ्मये प्रसरिताः सन्ति। सर्वेषां वर्गीकृतसंकलनं विधाय संघीयत्वेन नव्यान्वेषणस्य प्रयोजनं वर्त्तत एव इत्यलमविस्तरेण – विद्वद्वशंबदः।

*सन्दर्भ :*


१. भारतीय ज्योतिष – दिक्षितः – वैदिककालः
२. पञ्चाङ्ग कमेटी की रिपोर्ट – चुलैटः
३. विज्ञान विद्युत् – वि.वा. मधुसूदन ओझा
४. वेदविद्या निर्दर्शन
५. सिद्धान्तशिरोमणिः – भास्करः
६. ताराभौतिकी
७. अर्वाचीनज्योतिर्विज्ञान – रमानाथ सहायः
८. सांख्यकारिका
९. श्रीमद्भागवद्गीता
१०. तैत्तिरीयसंहिता, ५/६/७
११. वा.सं., ७/३०.
१२. ऐतरेय ब्रा., ३/१/७/७.


Vijnana Bharati